# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ७१

ततो दशाहेऽतिगते कृतशौचो नृपात्मजः ।
द्वादशेऽहनि सम्प्राप्ते श्राद्धकर्माण्यकारयत् ॥ १॥

ब्राह्मणेभ्यो ददौ रत्नं धनमन्नं च पुष्कलम् ।
बास्तिकं बहुशुक्लं च गाश्चापि शतशस्तथा ॥ २॥

दासीदासं च यानं च वेश्मानि सुमहान्ति च ।
ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्वदैहिकम् ॥ ३॥

ततः प्रभातसमये दिवसेऽथ त्रयोदशे ।
विललाप महाबाहुर्भरतः शोकमूर्छितः ॥ ४॥

शब्दापिहितकण्ठश्च शोधनार्थमुपागतः ।
चितामूले पितुर्वाक्यमिदमाह सुदुःखितः ॥ ५॥

तात यस्मिन्निषृष्टोऽहं त्वया भ्रातरि राघवे ।
तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोऽस्म्यहं त्वया ॥ ६॥

यथागतिरनाथायाः पुत्रः प्रव्राजितो वनम् ।
तामम्बां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप ॥ ७॥

दृष्ट्वा भस्मारुणं तच्च दग्धास्थिस्थानमण्डलम् ।
पितुः शरीर निर्वाणं निष्टनन्विषसाद ह ॥ ८॥

स तु दृष्ट्वा रुदन्दीनः पपात धरणीतले ।
उत्थाप्यमानः शक्रस्य यन्त्र ध्वज इव च्युतः ॥ ९॥

अभिपेतुस्ततः सर्वे तस्यामात्याः शुचिव्रतम् ।
अन्तकाले निपतितं ययातिमृषयो यथा ॥ १०॥

शत्रुघ्नश्चापि भरतं दृष्ट्वा शोकपरिप्लुतम् ।
विसंज्ञो न्यपतद्भूमौ भूमिपालमनुस्मरन् ॥ ११॥

उन्मत्त इव निश्चेता विललाप सुदुःखितः ।
स्मृत्वा पितुर्गुणाङ्गानि तानि तानि तदा तदा ॥ १२॥

मन्थरा प्रभवस्तीव्रः कैकेयीग्राहसङ्कुलः ।
वरदानमयोऽक्षोभ्योऽमज्जयच्छोकसागरः ॥ १३॥

सुकुमारं च बालं च सततं लालितं त्वया ।
क्व तात भरतं हित्वा विलपन्तं गतो भवान् ॥ १४॥

ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च ।
प्रवारयसि नः सर्वांस्तन्नः कोऽद्य करिष्यति ॥ १५॥

अवदारण काले तु पृथिवी नावदीर्यते ।
विहीना या त्वया राज्ञा धर्मज्ञेन महात्मना ॥ १६॥

पितरि स्वर्गमापन्ने रामे चारण्यमाश्रिते ।
किं मे जीवित सामर्थ्यं प्रवेक्ष्यामि हुताशनम् ॥ १७॥

हीनो भ्रात्रा च पित्रा च शून्यामिक्ष्वाकुपालिताम् ।
अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि तपोवनम् ॥ १८॥

तयोर्विलपितं श्रुत्वा व्यसनं चान्ववेक्ष्य तत् ।
भृशमार्ततरा भूयः सर्व एवानुगामिनः ॥ १९॥

ततो विषण्णौ श्रान्तौ च शत्रुघ्न भरतावुभौ ।
धरण्यां संव्यचेष्टेतां भग्नशृङ्गाविवर्षभौ ॥ २०॥

ततः प्रकृतिमान्वैद्यः पितुरेषां पुरोहितः ।
वसिष्ठो भरतं वाक्यमुत्थाप्य तमुवाच ह ॥ २१॥

त्रीणि द्वन्द्वानि भूतेषु प्रवृत्तान्यविशेषतः ।
तेषु चापरिहार्येषु नैवं भवितुमर्हति ॥ २२॥

सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्याभिप्रसाद्य च ।
श्रावयामास तत्त्वज्ञः सर्वभूतभवाभवौ ॥ २३॥

उत्थितौ तौ नरव्याघ्रौ प्रकाशेते यशस्विनौ ।
वर्षातपपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥ २४॥

अश्रूणि परिमृद्नन्तौ रक्ताक्षौ दीनभाषिणौ ।
अमात्यास्त्वरयन्ति स्म तनयौ चापराः क्रियाः ॥ २५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com